Shri Raghunath Temple MSS. Library,
JAMMU

No. १४९६

Title गदाधरी टीकायां काशिकारव्यायां व्यतिरेक ग्रन्थः

Author गदाधरः

Extent १६ Age ×

Subject न्याय वैशेषिकं

१८ पत्रे

गादाधरी टीकायां काशिकाख्यायां व्यतिरेकिग्रंथः

१४५६

पत्रे १६

श्लोक
८००

व्यतिरेकग्रंथः

ग०टी० १

श्रीगणेशाय नमः॥ ॥प्रसिद्धार्थेऽसत्ताभावाप्रतियोगित्वमात्रम्। तस्य विपक्षपदस्यालक्षणत्वेति। असत्त्वाभाववान् पक्षेति असत्त्वाभाव
वदित्यत्राभावप्रधाननिर्देशेनाभावलाभात् अभावो यत्र प्रतियोगितया सत्त्विति विग्रहार्थवशादभावाप्रतियोगित्वलाभः। लक्षणासंगमन
मूले चाभिधेयत्वस्येति लिंगपरमिति शाब्दाशयः। मीमांसकेदिति। दर्शितान्वयव्यतिरेकिलक्षणस्य तत्साधारणपातात्। तेषामिति। तत्र तदूष्यास्यव्याप्ते
रिति भावः। विपक्षपदस्य। विपक्षपदस्यापि। निर्धारणेति यत्र निर्धारणमिति सत्त्वं जातादिविशेषणं विशिष्टयद्धर्मावच्छिन्नस्य तादृशविशेष
णाशून्यतद्धर्मावच्छिन्नआवृत्तत्वविशिष्टविधेयवत्तया प्रतिपादनं तद्धर्मावच्छिन्नार्थकपदात्परषष्ठीसप्तम्याविति तदर्थः। सप्तम्याइति। केवलान्वया
देरनुमानाभिन्नत्वादिति भावः। तत्सदनुमानपरामर्शकं अनुमानत्वं तु सामान्यधर्म इत्याशयेन प्रांकैते यद्यपीति। सर्वेनाम्नां स्ववद्धिजपराम र्षं
र्शित्वाभावान्नानुमानमित्यस्य परामर्शः किंतु त्रिविधमित्यस्यैवेति समाधत्ते तथापीति। न च सत्सपक्षभिन्नः केवलान्वयित्वाद्यन्यतमत्ववान् केवलान्व
यित्वाभाववानित्यर्थः कुतः तथाविधः केवलव्यतिरेकीत्यर्थे लक्षणस्यापि सुवचत्वादित्यत आह उद्देश्येति। प्रसेकेति केवलव्यतिरेकित्वादेरित्यर्थः। ज्ञानस्य
लिंगस्य वा लक्ष्यतया तत्र वक्तुं त्रीत्यर्थसंबंधं विरहेणेति असंगतेति। लभ्यत इति। साध्याभावाधिकरणासत्त्वं साध्यस्य रत्निमदभावाप्रतियोगित्वादित्य प्रसि
स द्धं विहाय प्रसिद्धस्योपगमः। यद्वा सन् विपक्षोऽभाववान् यस्य सैद्धिपक्षसत्त्वन्य साधक इति क्रमेणोक्तार्थलाभः। अप्रसिद्धिमिति। पृथिवीतरेभ्यो भिद्यते राम० १
पृथिवीत्वादित्यादावपि साध्यनिश्चयसाधननिश्चययोः सत्त्वात्। अप्रसंगादिति। तादृशनिश्चयविषयाप्रसिद्धेरित्यादिः॥ संसाध्यं यदा चैतन्यस्य हेतुसह

चारनिश्चयो नास्तीत्येव स्यात्तु सोऽस्ति तत्कालावच्छिन्नस्वविषयकप्रकृतहेतुसहचारनिश्चयाभाववत्त्वरूपकत्वस्य सत्त्वादुभौ पुरुषौ प्रति केवलान्वयि
त्वापत्तिरतस्तत्स्वरूपेति। तत्कालावच्छिन्नेत्यभावविशेषणं सहचारनिश्चयदशायामयमिदानीं केवलव्यतिरेकीति व्यवहारवारणाय गोरश्व
त्वादित्यादिस्थलीयसाध्यस्येव तादृशातानसदिति। तादृशेति स्वविषयतद्धेतुसहचारेत्यर्थः। स्वरूपेति तत्स्वरूपेत्यर्थः प्रयोजनं स्फुटं। भगवतीति। त
था च यस्य पुंसः इत्यादिदोषस्यानवकाशः। निश्चयाभावस्तु नोक्तः निश्चयदशायां व्यवच्छेदेन तदभावस्यासत्त्वात्। व्यतिरेकसहचारग्रहेऽपि अन्वयस
हचाराग्रहमात्रात् लक्ष्यत इति मते लक्षणं परिष्कृतं तत्स्यान्वयसहचाराग्रहदशायां व्यतिरेकसहचारग्रहसत्त्वे लक्ष्यत्वमतेऽतिव्याप्तिं शंकते नचयत्रे
ति। उक्तलक्षणेऽतिव्याप्ति। अगृहीतान्वयव्यतिरेकिसाध्यकस्वरूपोक्तलक्षणे इत्यर्थः। व्यापकताग्रहहेतोरिति तथा चान्वयसहचारग्रहानधीनव्यापकताग्र
हाधीनत्वमनुमितिविशेषणमित्यर्थः। प्रकृतसाध्येति। एतन्मते व्यतिरेकव्याप्तिर्नास्त्येव तदुक्तं मणिकृता व्यतिरेकसहचारेण व्याप्तिग्रह इति
। तथा चान्वयसहचारग्रहानधीनत्वाभावाद्व्याप्तिरित्यर्थः। अन्वयसहचाराधीनव्यापकताग्रहानधीनत्वं तु न विशेषणं पत्रव्यतिरेकसहचारग्रा
नज्ञानाधीनान्वयव्याप्तिज्ञानोत्तरपरामर्शाधीनानुमितिस्तत्र व्याप्तिज्ञानेः व्याप्तेः अनुमितेस्तदनधीनत्वासंभवात्। क्वचित्सत्तियोग्यप्रसिद्धेश्चा
नस्यतिरिति। अत्र च व्यतिरेकि तादृशोऽसत्त्वानुमितेर्व्यतिरेकसहचारग्रहाधीनव्यापकताग्रहाधीनत्वमिति भावः। सामानाधिकरण्यसमवायग
र्भ। एवं चेति। एतेन तत्कालावच्छिन्नस्वविषयकतद्धेतुसहचारनिश्चयत्वाभाववत्तत्स्वरूपकसाध्यकत्वमनुमितिविशेषणं नादेयमिति सूचितं का

ग.टी.
२
2

लघुरूपगर्भत्वात्। अनुगतरूपेणेति। तत्तद्व्यभिचारज्ञानविरोधित्वं। अधिकरणविशेषांतर्भावेणाव्यभिचारग्रहे ऽधिकरणविशेषवृत्तितत्सहचारग्रहस्य
विरोधित्वात् लिंगकरणतापक्षे इतिज्ञानस्य करणतापक्षे फलोपधानमुपलक्षणमेवेति सूचितं। नन्वेवमन्वयसहचारग्रहदशायामपि साध्याभावाप्र
सिद्ध्या व्यतिरेकसहचारग्रहासंभवात् तत्र व्याप्त्यसंभवेन व्यतिरेकित्वं व्यर्थमित्यत आह एवं चेति। उपधानमिति। अत्र तु प्रधानेन तत्प्रसंगव्यंजकं। पू
र्ववदिति। तदाग्रहीतोऽन्वयो यत्रेति। फलितार्थ इति। प्रकृतहेतुसाध्यसहचारनिश्चयाधीनव्यापकताग्रहप्रयोज्यव्यतिरेकप्रतियोगिप्रकृतसाध्यका
नुमितिकरणमिति निष्कर्षः। तेन व्याप्तेः सहचारगर्भतया यथाश्रुतस्य केवलव्यतिरेकिण्यप्रसिद्धावपि न क्षतिः। तत्कालीनत्वं तत्तत्पुरुषीयत्वयोः प्रयो
जनं स्फुटं अत्र फलोपधानं निवेश्यं। मूलेति असंताभावाप्रतियोगिसाध्यकत्वं। तस्याः केवलान्वयितायाः। तथात्वं अन्वयनिरूप्यत्वं। लिंगकरणताप
क्षे परिष्करोति अन्वयेति। प्रकृतसाध्यसाधनसहचारेतरसहचारज्ञानाजन्यत्वनिवेशोऽव्याप्तिप्रदर्शितादृशसहचारज्ञानजन्यव्याप्तिज्ञानाजन्यत्वनि
वेशोऽव्याप्तिमाह अन्यदीयव्याप्तिविषयके इति समूहालंबनस्य प्रकृतसाध्यसाधनसहचारेतरसहचारादिविषयकत्वेन लक्षणाघटकत्वादिति भा
वः। प्रकृतेति। प्रमेयवान् वाच्यादित्यादौ वस्तुमात्रसहचारस्य साध्यसाधनसहचारतया तदन्यसहकाराप्रसिद्धिरतः साध्यसहचारविषयतान्यसहचा
रविषयतानधीनत्वं मात्रार्थः साध्यसहचारविषयता च निरूप्यनिरूपकभावापन्नोपादेयानेन वह्नित्वेन घटादिसहचारविषयतामादायनाव्याप्तिरित्यग्रे एम. २
स्फुटं। सहचारद्वयज्ञानाधीनायां व्यतिरेकसहचारज्ञानाधीनाया अनुमितेर्न तादृशत्वमास्यवगाहितालिंगजन्यतयाऽन्वयव्यतिरेकिणि केवलव्यतिरेकि

त्रिवान्न साधन एवातिव्याप्तिरतः प्रयोज्यत्वेति तत्कालीनत्वं चानावश्यकं कालांतरीणानुमितिवृत्तिसाध्यविषयतायाः तादृशावशादित्वाप्रयोज्यत्वात्।
साध्यसहचारमात्रविषयकज्ञानजन्यतानिवेशे व्यतिरेकसहचारग्रहोत्तरव्याप्तिज्ञाने अन्वयसहचारग्रहजन्यतासत्त्वादतिव्याप्तिरतोऽधीनेति समा
नाकारकज्ञाने भुविविषयिताभेदाभावेपि प्रयोजकभेदेन प्रयोज्यताभेदात् तत्र तादृशाप्रयोज्यताविरहान्न दोषः प्रयोज्यता ज्ञानांतर्भावे रोति नतत्र कथं
तापि। वस्तुतस्तु ज्ञानभेदेन विषयिताभेदमते नेदं स्यात् एवानुपदमग्रेपयपि साध्यादिग्रंथसंगतिः। तस्य अन्यसाध्यकतादृशहेतोः। वक्ष्यमाणस्वरसा
दाहवस्तुत इति। जन्यज्ञानविषयो जन्यज्ञानविषयत्वाभावादित्यादौ यत्र जन्यज्ञानविषयत्वाभाववत्त्व जन्यज्ञानविषयत्वाभावाभावइति व्यतिरेकसह
चारग्रहीतव्याप्तिके कपिसंयोगाभाववान् कपिसंयोगादित्यादौ यत्र कपिसंयोगाभाववत्त्व कपिसंयोगाभावइति व्यतिरेकसहचारग्रहीतव्याप्ति
केच व्यतिरेकिण्यतिव्याप्तिरतः साध्यीयत्वसाधनीयत्वयोः क्रमेण सहचारघटके निवेशः। उक्तातिव्याप्तिसाध्यतदितरेत्यादिनोक्तातीत्यर्थः। करणमेवे
त्येवकारेण करणतानिरूपकतावच्छेदकत्वेन तत्साध्यविषयकत्वनिवेशव्युदासः। अन्यथा करणत्वविशेष्यतयातदनिवेशे। एतल्लक्षणे फलो
पधानस्य विशेषणतया निवेशः। तस्य व्याप्तिज्ञानस्य यदिव्यवच्छियत इति। साध्याभाववत्साधनाभाववत्सहचारविषयतानधीनत्वनिवेशोऽइत्यर्थः। उ
र्वचमिति। संबंधत्वेनासंबंधत्वादितिभावः। साध्यतावच्छेदकतापर्याप्त्यधिकरणेति। अत्र पर्याप्तिप्रवेशे प्रवेशो प्रमेयवदभिधेयवान् वाच्यवत्त्वइत्यादौ प्र
मेयादिसाध्यतावच्छेदकस्थले वस्तुमात्रसहचारविषयत्वमात्रस्यैव साध्यतावच्छेदकप्रमेयावच्छिन्नवत्तोपरागेण सहचारविषयतातात्पर्यस

ग०टी०
२

ता २

हचारविषयतायाअसिद्धेरतःपर्याप्तिप्रवेशः। तथासतिप्रमेयत्वविशिष्टस्यैवसाध्यतावच्छेदकतापर्याप्त्यधिकरणत्वान्नदोषः एकसहचा
रः अन्वयसहचारः। अव्याप्त्यापत्तेरिति। तथाविवक्षायांतुसहचारत्वावच्छिन्नान्यदीयसहचारविषयताया[illegible]आप्तिमानप्रयोजकतयातत्त्वज्ञाप
कत्वमन्वयसहचारविषयतात्वेऽसत्त्वमितिभावः। व्यतिरेकसहचारेप्रमेयाभावाभिधेयाभावसहचारेऽवस्तुमात्रसहचारस्यैवसाध्यसाधन
सहचारत्वात्तन्नातिप्रसंगइति। साध्यतावच्छेदकावच्छिन्नीयविषयितायांभावादितिभावः। अभावत्वेनेतिअभाववान्अभावादित्यादौ
अन्यतरइतिप्रकृताभिप्रायेण। एतेनअत्रविशेषणतासंयोगसंबंधाभ्यांसाध्यहेतुभावत्तत्राभाववान्भावादित्यादित्यादौप्रमाभावाभावस्त
त्राभावाभावइतिसहचारभ्रमस्थलेतिव्याप्तिरितिप्रत्युक्तं। उभयत्रनिशिसंबंधनिवेशस्याभिप्रेतत्वात्। अथसाध्यतावच्छेदकतापर्याप्त्यधिक
रणधर्मावच्छिन्नविषयतानिरूपितस्यसाधनतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयतानिरूपितस्यवासहचारत्वावच्छिन्न
विषयत्वस्यनिवेशान्नायंदोषः। अन्यथाप्रमेयवद्वान् अभावादित्यादौदैशिकविशेषणतासंबंधेनसाध्यहेतुभावेयत्रसाध्याभावस्तत्रहे
त्वभावइतिभ्रमस्थलेप्रमेयरूपसाध्याभावत्वावच्छिन्नसहचारविषयत्वमादायाभाववान्प्रमेयवतइत्यादौयत्राभावाभावस्तत्रप्रमेयवद ग्र०
भावइतिभ्रमस्थलेप्रमेयात्मकसाधनाभावत्वावच्छिन्नविषयत्वमादायातिव्याप्तिः। पर्याप्तिनिवेशोचोभयत्रापिसंबंधनिवेशवैयर्थ्यमिति २
चेदत्रापिहिमहानसीयधूमोमहानसीयवह्निसमानाधिकरणइत्यादिज्ञानानामसंग्रहादव्याप्तिरितिअधिकमनुपदमग्रे। स्वसाध्यंजन्यतानवि

3

पत्वाभावः स्वहेतुः। उक्तेति व्याप्तीति। जन्यज्ञानविषयत्वादिसाध्यकातिव्याप्तीत्यर्थः। व्यतिरेकयोरिति। कपिसंयोगी एतत्त्वादित्यादौ एतद्वृक्षत्ववा
नकपिसंयोगादित्यादौ वा। तादृशयोः प्रतियोगिवैयधिकरण्यावच्छिन्नव्यतिरेकयोः। तद्ग्राहकत्वं। अन्वयव्याप्तिग्राहकत्वं। प्रतियोग्यधिकरणो
धूमाधिकरणो। प्रतियोगिवैयधिकरण्याद्वरितव्यतिरेकसहचारस्य च तथाभूतस्य व्यभिचारज्ञानाविरोधिनः। सहचारग्रहस्य उभयसहचारग्र
हस्याविनिगमनाविरहेतोतिशेषः। स्वातंत्र्येणेति केवलव्यतिरेकिविलोपवारणाय। अन्यथा धूमादिव्यापकवन्ह्यादिसमानाधिकरणावृत्तिधू
मत्वादिरूपव्याप्तिघटकसहचारज्ञानस्याविशेषणाज्ञानविधया हेतुत्वेऽतिप्रसंगापातादिति। अन्वयव्यतिरेकोभयसहचारग्रहदशायां अन्वयव्य
तिरेकितातिशेषः। तत्र कश्चिद्विशिष्टावगाहि। तद्यथा पर्वतो धूमसमानाधिकरणो वह्निमान् वह्निश्च धूमव्यापक इति समूहालंबनरूप। तद्वि
शिष्टवैशिष्ट्येति। सहचारविशिष्टाभाववैशिष्ट्यमित्यर्थः। तादृशसहचारस्य अन्वयव्याप्तिघटकाभावनिष्ठहेतुसहचारस्य। पदार्थान्तरेति पर्वतीयव
ह्निमान् पर्वतत्वसहचरितधूमादित्यादौ पदार्थान्तरीयेति द्वयघटकत्वव्यापकं वह्निर्धूमव्यापकश्चेत्यादिः। तत्वं च व्यापकत्वभानप्रयोजकत्वं च। तादृ
शसहचारः। अभावनिष्ठहेतुसहचारः। उत्तरत्राप्येवं। उक्तसहचारः। अन्वयव्याप्तिघटकाभावनिष्ठहेतुसहचारः। स्वमनुमितिः। पद्रूपं सहचारप्रति
योगितावच्छेदकानुयोगितावच्छेदकधर्मद्वयं। अंततः पातित्वं तदवच्छिन्नप्रतिबंधकतावच्छेदकत्वं तद्व्यापकत्वं वा। प्रकृतेति स्वोपधानप्रयोजकव्या
प्तिविषयतासंबंधप्रयोजकसहचारविषयतात्वेत्यर्थः। पूर्वेति। लक्षणावतारिकाभिहितेत्यर्थः। सहचारत्वावच्छिन्नविषयतापर्यंतनिवेशप्रयो

ग॰टी॰
४
५

जनं पूर्वोक्तमेव। व्यतिरेकसहचारज्ञानमिति। वह्निमान् धूमादित्यादौ व्यतिरेकिणि यत्र वह्न्यभावस्तत्र धूमाभाव इति सहचारदर्शनगृहीतव्या
प्तिके व्यतिरेकसहचारविषयतायां व्याप्तिग्राहिकायामन्वयसहचारज्ञानीयमुद्राधिकरणानिरूपितत्वनिरूपितत्वविषयतात्वसत्त्वादिति भावः। अति
प्रसंगेनेति। व्यतिरेकसहचारेणान्वयव्याप्तिग्रहस्थले व्याप्तिविषयतां ततः यातिनीया व्यतिरेकसहचारविषयता तादृशसहचारत्वावच्छिन्नविष
यतात्वस्य प्रकृतव्याप्तिग्राहकव्यतिरेकसहचारविषयतात्वव्यापकत्वात् केवलव्यतिरेकिण्यपि प्रसंगेनेत्यर्थः। उक्तसहचारज्ञानीयेति। यत्र धूमाभा
वाभाववत्तत्र वह्न्यभावाभाववदित्यादिज्ञानीये इत्यर्थः। तद्रूपावच्छिन्नत्वादिति। अभावत्वावच्छिन्नत्वादित्यर्थः। व्याप्तिघटकतेति। धूमाभाववान् वह्न्य
भावादित्यादावुक्तव्यतिरेकसहचारज्ञाने व्याप्तिघटकतानवच्छेदकं यद्धूमाभावप्रतियोगिकत्वं तदवच्छिन्नमेव प्रतियोग्यादिविषयकत्वमित्य
र्थः। व्याप्तिघटकतेति व्यतिरेकसहचारघटकधूमाभावाभावत्वावच्छिन्नसहचारविषयतायामिदं प्रसिद्धं। व्याप्तिग्राहकतायामिति। व्याप्तिग्राहक
ताप्रयोजकत्वाभावस्सूचकं। दर्शितेति। धूमाभाववान् वह्न्यभावादित्यादौ एवं तेन यत्नेनेत्यपि। प्रकृतसाध्यतेति। तेन रूपेण तत्साध्यरूपांतरेणा
तत्साध्योभयविषयकसमूहालंबनात्मकानुमितिकरणो रूपांतरेण तत्साध्यके केवलान्वयिनि चातिप्रसंगः। प्रकृतसाध्यव्याप्तित्वेत्यत्र रूपानि
वेशान्तत्तन्निवेशे चाव्याप्तिः। प्रकृतसाध्यव्याप्तित्वस्येवाप्रकृतसाध्यव्याप्तित्वस्यापि यद्रूपशब्देनोपादानादिति करणतानिरूपकतावच्छेदकतया सा
ध्यविषयकत्वांतनिवेशः। तत्कालीनत्वं तत्पुरुषीयत्वं च प्राग्वत्। हेतुतेति पादशः रूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारताकनिश्च

गम॰
४

यतं प्रकृतसाध्यकानुमितित्वघटितधर्मावच्छिन्नतत्कालीनतत्पुरुषीयानुमितिनिष्ठकार्यतानिरूपितकारणतावच्छेदकं तादृशरूपनिष्ठविषयतात्व
व्यापकान्वयव्याप्तित्वावच्छिन्नविषयतात्वकानुमितिफलोपहितकारणत्वं केवलान्वय्यनुमानत्वं। अन्वयव्यतिरेकानुमानेऽतिव्याप्तिवारणाय
तादृशविषयतात्वसामानाधिकरण्यमुपेक्ष्य तद्व्यापकत्वनिवेशः। कृतं व्यापकनिर्गंधत्वसमानाधिकरणपृथिवीत्वव्यापकाभावप्रतियोगिमत्त्व
वानिति परामर्शीयस्य स्वरूपसंबंधरूपावच्छेदकत्वनिवेशेन पादशरूपशब्देन व्यतिरेकव्याप्तित्वावच्छिन्नमादाय तद्रूपावच्छिन्नप्रकृतहेतुतावच्छे
दकीभूततादृशव्याप्तिस्वरूपावच्छिन्नप्रकारताकत्वस्य स्वरूपसंबंधरूपावच्छेदकतया तादृशरूपविषयतायामन्वयव्याप्तित्वावच्छिन्नविषयतात्ववि
रहादित्यर्थः। तदानींतनेति केवलान्वयितादृशोऽस्मन्नेत्यर्थः। केवलपक्षधर्मताता नमन्यथासिद्धं अन्वयव्याप्तिविशिष्टप्रकृतहेतुमत्ताज्ञानमेव केवला
न्वयित्वबीजमित्याशयेनाह अयं भाव इति। व्याप्तिविशिष्टवत्तेति। ननु व्याप्तिविशिष्टप्रकारताया अपि व्याप्तिघटकपदार्थीयनिरूप्यनिरूपकभावाप
न्नविषयतात्वेन स्वरूपसंबंधरूपावच्छेदकत्वसंभवतीति कथमेतन्मेवं प्रकृतव्याप्तिवारणार्थमेव स्वरूपसंबंधरूपावच्छेदकत्वसागोमिप्रेतः ए
वं च तादृशावच्छेदकत्वासंभवादित्यस्य तादृशावच्छेदकतापर्याप्त्यधिकरणतासंभवादित्यर्थः। एतच्च पर्याप्तिनिवेशोऽसंभवसूचकं। निरुक्तव्याप्तिं
त्वं प्रकृतसाध्यकानुमित्यौपयिकव्याप्तित्वं। धूमत्वेति। पूर्ववद्रूपहेतुतावच्छेदकपदाभ्यामेकस्यैव धूमत्वस्योपादानसंभवादिति। प्रमेयं घटत्वव्यापका
दित्यादावव्याप्तिसंभवात् व्यतिरेकव्याप्तेर्हेतुतावच्छेदकतानुसरणं व्यर्थमित्यत आह अन्यथेति। प्रकृतसाध्येति। वह्न्यभाववान् वह्निव्यापकीभूता

ग॰ टी॰ ५ भावप्रतियोगिमत्त्वादित्यादौ वक्ष्यमाणरीत्यापि प्रकृतहेतुतावच्छेदकावच्छिन्नविशेषणतायत्नपादशरूपावच्छिन्नप्रकारतायां स्वरूपसंबं
धरूपजनकतावच्छेदकत्वनिवेशेपि हेतुतेति वह्निव्यापकीभूताभावप्रतियोगित्वरूपप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारताकनिश्चयत्वस्य
तादृशजनकतानतिरिक्तवृत्तित्वादित्यभिमानः। केवलान्वयितानुपूर्ववदेव। साध्याभाववद्वृत्तित्वस्य हेतुतावच्छेदकत्वे व्याप्त्यंतरबोधं विनानुमि
तिः तस्य मणिकारेण व्याप्तित्वानुपगमादिति ध्येयं। तत्कालीनतादृशानुमितिजनकताया अन्वयव्याप्तिविषयकपक्षधर्मताज्ञानसाधारण्यमभिमानि
वर्तकमाह तद्विशिष्टवत्तेति। उक्ताभिमाननिरासस्येव समाधाननिर्वाहमाह प्रकृतेति। विशेषणतायत्नेति एतच्चान्वयव्याप्तित्वव्यवच्छेदिका व्यतिरेकव्या
प्तिरिति यथाश्रुतमालंब्योक्तं। मेयत्वादि विशिष्टेति। यद्यपि प्रकृतहेतुविशेषणतायत्नयद्रूपावच्छिन्नप्रकारतास्वरूपसंबंधरूपजनकतावच्छेद
दकतावतीत्युक्तौ मेयत्वावच्छिन्नप्रकारताया नोपादानसंभवस्तथाप्यनुमित्यौपयिकत्वस्य निश्चयत्वादिगर्भतया तत्कल्पपरिष्कारार्थोऽयमारं
भः। ननु वह्निव्यापकीभूताभावप्रतियोगितावच्छिन्नविशेषणतायत्नवह्निव्यापकीभूताभावप्रतियोगितावच्छिन्नप्रकारकनिश्चयत्वस्यापिज
नकतानतिरिक्तवृत्तित्वात्स्वरूपसंबंधरूपतदवच्छेदकत्वाच्च तन्नव्याप्तिः परिहर्तुं शक्यते इत्यत आह वस्तुतस्त्विति। वस्तुतस्तु व्याप्त्यंतरविष
यकहेतुतावच्छेदकीभूतव्यतिरेकव्याप्तिविशिष्टपक्षधर्मतानिश्चयस्य कारणत्वाभिमानं निरस्यन्नेव पूर्वनिष्कृष्टमनुमित्यौपयिकव्याप्तित्वं दर्श राम॰
यति वस्तुतस्त्विति। यद्रूपेति यद्रूपं अन्वयव्याप्तित्वं व्यतिरेकव्याप्तित्वं चा यद्रूपविशिष्टावच्छिन्नत्वं विवक्षितं। तेन मेयत्वादिनान्वयादिव्याप्त्यवच्छि ५

न्नप्रकृतहेतुनिश्चयेऽनतिरिक्तवृत्तित्वभंगेपिनक्षतिः तथा च वह्निव्यापकीभूताभावप्रतियोगिसमानाधिकरणाभावप्रतियोगितानवच्छेदकवन्ह्यभाव
त्वावच्छिन्नसमानाधिकरणावह्निव्यापकीभूताभावप्रतियोगितामानितिपरामर्शकालीनानुमित्युत्पादप्रयोजकव्यतिरेकव्याप्तिमादायनतत्राव्याप्तिः।यद्रू
पावच्छिन्नप्रकारकनिश्चयत्वस्य हेतुतावच्छेदकावच्छिन्नप्रकारकनिश्चयत्वस्य च जनकतातिरिक्तवृत्तित्वात्तदुभयनिवेशः। एवं च प्रकृतहेतुतावच्छेदका
वच्छिन्नविशेषणतापन्नयद्रूपावच्छिन्नप्रकारताशालित्वेन लक्षणे निवेशो गौरवादनुपादेयः अत्र च यादृशरूपपदेनव्याप्तित्वावच्छिन्नोपादाने धूमवा
न्वह्नेरित्यादावन्वयव्याप्तिभ्रमदशायां केवलान्वयित्वानुपपत्तिः तत्रव्याप्यप्रसिद्धेः। विषयतानिष्ठरूपमादाय यादृशरूपविशिष्टविषयतानिरूपितप्रकृत
हेतुतावच्छेदकावच्छिन्नप्रकारताकनिश्चयत्वं जनकतावच्छेदकमिति रीत्योक्तौ वास्तवव्याप्तिप्रकारकत्वघटितधर्मस्य स्वरूपसंबंधरूपावच्छेदकत्वाप्र
सिद्ध्याऽनतिरिक्तवृत्तित्वनिवेशाविरोधइति सदनुमानस्यैव लक्ष्यतामभिप्रेत्य तथा निवेशितं भ्रमात्मककरणस्य तत्र लक्ष्यत्वे तु स्वरूपसंबंधरूपावच्छेदक
त्वनिवेशे व्यतिरेकव्याप्तिहेतुतावच्छेदकस्थले तादृशव्याप्तिविषयताघटितधर्मस्य स्वरूपसंबंधरूपावच्छेदकत्वेनाव्याप्तिभियैवानतिरिक्तवृत्तित्वनि
वेशनं। यद्यप्यनतिरिक्तवृत्तित्वानिवेशे विषयतागताधेयतावच्छिन्नविषयतात्वमादायासंभवः संभवति तथापि विषयतागतधर्मः अन्वयव्याप्तित्वा
वच्छिन्नविषयतात्वव्यतिरेकव्याप्तित्वावच्छिन्नविषयतात्वान्यतरत्वेन विशेषणीयः। यद्विषयतानिरूपितहेतुतावच्छेदकावच्छिन्नविषयतेत्यादिक्रमेणवा
विषयताव्यक्तेरेवपदद्वयोक्तित्वेन निवेशइति नासंभवः। यद्यपि तादृशविषयताघटितधर्मस्य स्वरूपसंबंधरूपावच्छेदकत्वपर्याप्तिनिवेशः संभवति तथापि

ग॰टी॰ पर्यापर्यालोचनेन महागौरवं बोध्यं। उक्ताशंकावारणाय केवलपक्षधर्मताज्ञानस्य हेतुत्वं निरस्यति। मेयत्वादिकमित्यादिना आदिना वह्निव्यापकाभावप्रति
६ योगित्वादिपरिग्रहः। तेनैतादृशप्रतियोगित्वावच्छिन्नतादृशप्रतियोगिताश्रयवत्ताज्ञानस्यापि जनकत्वाभिमाननिरासः। एतेन यद्रूपहेतुतावच्छेदकशब्दा
8 भ्यां हेतुतावच्छेदकव्यतिरेकव्याप्युपादानं न संभवति केवलपक्षधर्मताज्ञानस्य जनकताशङ्क्यनयाः नातिरिक्तहेतुतासंभवादिति सूचितं। ननु जलत्वत्वा
वच्छिन्नतादृशप्रतियोगित्वविशिष्टजलत्वादेर्यन्न हेतुता तन्नान्वयव्याप्तिविषयकहेतुतावच्छेदकविशिष्टप्रकारकज्ञानस्यापि कारणत्वमुपेयं अन्य
थाशुद्धजलत्वेन वह्न्यभावानुमानापत्तेः तथा च तदनुरोधेन यद्रूपावच्छिन्नप्रकारकनिश्चयत्वं जनकतानतिरिक्तवृत्तितत्त्वमेवानुमित्सोपयिकव्या
प्तित्वं वाच्यं एवं च केवलान्वयिनि तादृशप्रतियोगिताविशिष्टजलत्वत्वरूपहेताववव्याप्तिरित्यत तत्र केवलव्यतिरेकि नामाह वह्नीति। तदवच्छिन्नांशो। तादृ
शप्रतियोगित्वावच्छिन्नांशो। तावता हेतुतावच्छेदकावच्छिन्नांशे तदभानात्। एवं च नान्वयिताप्रसंग इति भावः। प्रतियोगित्वं तस्य हेत्वघटकतामाविष्क
रोति अपि त्विति। एतावता अन्वयव्याप्तेरवच्छेदिकाव्यतिरेकव्याप्तिरित्यस्यान्वयव्याप्तिविशिष्टहेतुतावच्छेदकीभूतव्यतिरेकव्याप्त्यवच्छिन्नज्ञानं कार
णमित्याशयो विवृतः ननु सैवेत्यस्याशयमाह निरूक्तेति। जलत्वत्वरूपेत्यर्थः। तथा च तादृशप्रतियोगित्वप्रकारकज्ञानस्य हेत्वभावप्रतियोगितावच्छेद राम॰
कानवगाहितया जनकत्वाभावाद्यादृशरूपपदेन तादृशप्रतियोगित्वस्योपादानासंभवान्नाव्याप्तिरिति भावः। उपयुज्यतामिति। अनुमितावित्यनुषज्यते ६
। तादृशप्रतियोगित्वस्य व्याप्तित्वे तद्घटितावच्छेदकतया हेतुतावच्छेदकनिवेशआवश्यकः अन्यथा धूमाभाववद्व्यापकाभावप्रतियोगित्वाभावविशिष्ट

वह्न्यादेर्दोषत्वापत्तेः। इदानीं तु तादृशप्रतियोगितावच्छेदकत्वविशिष्टवह्नित्वाप्रसिद्धेस्तदभाववद्विशिष्टवह्न्यादेर्दोषत्वासंभवाद्व्याप्तिधर्मितावच्छे
दकतया हेतुतावच्छेदकनिवेशो न कार्य इति दर्शयति आसीत्यादि स्वरूपासिद्धिसंग्रहाय तु स्वतया हेतुतावच्छेदकनिवेशसूचकं। एतेन व्यतिरेकव्या
प्तेरपि हेतुतावच्छेदकघटिततया व्यवस्थापनेन। उक्तानुमानस्य व्याप्यविषयकलिंगज्ञानस्य (तद्रूपावच्छिन्नव्यतिरेकित्वमिति पाठः। तद्रूपावच्छि
न्नान्वयव्यतिरेकित्वमिति पाठे अन्वयव्याप्त्यवगाहितज्ज्ञानं दृष्टसां हेतुर्निर्दिशति। तादृशाभावप्रतियोगिजलत्वादीति निर्दिश्यस्यैव साध्यप्रसाधि
कत्वादिति। नन्वेवं दीधितिलाघवेन जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वात् गंधव्यापकीभूताभावप्रतियोगिमत्त्वाद्वेत्यादावन्वयव्या
प्तेरवच्छेदिकाव्यतिरेकव्याप्तिर्न प्रकृतसाध्यानुमित्यौपयिकी तद्विशिष्टपक्षधर्मताग्रहेऽपि निर्गन्धत्वानुमित्यनुदयादित्येवं वक्तुमुचितमुभयत्रै
वानतिरिक्तवृत्तित्वगर्भानुमित्यौपयिकत्वनिराकरणात्। पृथक् वह्न्यभाववान् वह्निव्यापकीभूताभावप्रतियोगित्वहेतुतावच्छेदकानुसरणस्य
बीजासंभवात् कथनासंभवादिति चेत्सत्यं। प्रमाद एवेत्यत्र दीधितिकाराणामिति संप्रदायः। अत्र प्रतिभाति जलं निर्गन्धमित्यादौ हेतुतावच्छेदक
स्य प्रकृतसाध्यानुमित्यौपयिकव्याप्त्यनात्मकतया केवलं तद्विशिष्टज्ञानस्यान्यथासिद्धतया च व्याप्त्यंतरविषयकतद्धेतुज्ञानमेव कारणं वाच्यमि
ति तत्रानतिरिक्तवृत्तित्वगर्भानुमित्यौपयिकत्वनिराकरणं कृतं ततस्तथाविधानुमित्यौपयिकत्वनिवेशोऽपि तादृशव्याप्त्यनात्मकहेतुतावच्छेद
कस्थलेऽसंतरबोधेऽपि तद्विशिष्टज्ञानमेव जनकं स्यात् व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वादिष्टापत्तौ चाव्याप्तिरित्याशंकायामन्वयव्याप्तेरवच्छे

ग॰टी॰ ७ दिकाव्यतिरेकिव्याप्तिरित्यभिहितं। तथाच हेतुतावच्छेदकावच्छिन्नविशेषणतायन्नव्याप्तिप्रकारकनिश्चयत्वेन कारणतान्नतु सैवेति अन्वयव्याप्ते
रनवच्छेदिकाव्यतिरेकव्याप्तिरनतिरिक्तवृत्तित्वगर्भानुमित्योपयिकी। तथाच केवलहेतुतावच्छेदकविशिष्टज्ञानस्य व्याप्तिविशिष्टहेतुतावच्छेदक
विशिष्टवैशिष्ट्यनिश्चयत्वं नास्तीति अकारणत्वान्नाव्याप्तिरिति अव्याप्तिवारणप्रकारप्रदर्शनमात्रमिति किमनुपपन्नं साध्यांतरोपादानं च परप्रति
पत्त्यर्थमिति। अथ वह्निव्याप्यधूमवत्पर्वतकालीनत्वविशिष्टधूमत्वावच्छिन्नप्रकारकनिश्चयत्वस्य जनकतानतिरिक्तवृत्तित्वाय त्वदेन तादृशका
ने लीनत्वोपादानासंभवः व्यतिरेकव्याप्तिविषयतात्वाभावे तादृशविषयतात्वव्यापकत्वनिवेशापेक्षा अणात्रहेतोबइतिवाच्यं वह्निव्याप्यधूमव
त्पर्वतकालीनव्याप्तेरेव मत्सदेनोपादेयतया संभवस्य ईर्वारत्वादिति चेन्न तादृशरूपस्य तादृशरूपांतरएघटितत्वेन विशेषणीयत्वात्। प्रकृतसा
ध्यकपक्षकृतहेतुकेतिदीधितिपाठाभावेपि पदरूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारताकेत्यादिनिवेशादेव प्रकृतहेतुकत्वसंभवइत्य
भिप्रेत्याह जलत्वमिति। प्रकृतहेतुकत्वं च व्याप्तिविशेषणं। प्रकृतसाध्यकत्वमनुमितिविशेषणं। पृथिवीत्वेति। पृथिवीत्वव्यापकीभूताभावप्रति
योगितावच्छिन्नाभावस्य हेतुवृत्तकत्वे वच्छेदककोटावपि तथैव तादृशाभावप्रवेशादात्माश्रय इत्यर्थः। तादृशप्रतियोगित्वेन यल्लिंगज्ञानमितिय
थाश्रुतार्थे समूहालंबनात्मकलिंगज्ञानमादायासंभवादाह पदरूपेति। तत्कालीनत्वादिप्रयोजनं पूर्ववत् तद्रूपावच्छिन्नमिति लिंगकरणतामतेन ए म॰ ७
अत्र केवलव्यतिरेकितादृशीत्यत्रानुमितिजनकतावच्छेदकत्वाभावस्य व्याप्तिरूपप्रकारतानिरूपितलिंगविषयतायां बाधाभाव व्यापकीभूता
कृतसाध्यकत्वमनुमितिविशेषणं४

भावप्रतियोगित्वप्रकारतानिरूपितलिंगविषयतायां वा सत्त्वादिति व्याप्तितः सामान्यपदं। व्यापकाभावप्रतियोगित्वप्रकारतानिरूपितान्वय-
व्याप्तिप्रकारतानिरूपितलिंगविषयताया अनुमित्यौपयिकत्वाद् व्याप्तिरन्तरपदं। साध्याभावातिरिक्तेति व्यतिरेकिवारणाय। लिंगतावच्छेद-
केति जले निर्धूमत्वादावव्याप्तिवारणाय। व्यतिरेकसहचारमिति। स्वनिष्ठप्रकृतसाध्यविधेयताप्रयोजकसहचारविषयतात्वव्यापक-
व्यतिरेकसहचारविषयतात्वकानुमितिकरणत्वमित्यर्थः। व्यतिरेकव्याप्तिमिति प्रकृतसाध्यविधेयकानुमितित्वघटितधर्मावच्छिन्नतत्का-
लीनतत्पुरुषीयानुमितिनिष्ठकार्यतानिरूपितकारणतापर्याप्त्यादृशरूपावच्छिन्नहेतुतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वमवच्छेद-
कं तादृशरूपनिष्ठविषयतात्वव्यापकव्यतिरेकव्याप्तितावच्छिन्नविषयतात्वकानुमितिफलोपहितकरणत्वमित्यर्थः। उभयेति स्वनिष्ठप्रकृत-
साध्यविधेयताप्रयोजकान्वयव्यतिरेकसहचारविषयताकानुमितिकरणत्वं तथाविधान्वयव्यतिरेकव्याप्तिविषयताकानुमितिकरणत्वं च क्र-
मेणार्थः। द्रव्यत्वादीति आकाशपदाद् द्रव्यत्वादिना शाब्दबोधवारणाय। प्रथमे इति। धर्मित्वरूपहेतुमति अन्योन्याभावप्रतियोगितावच्छेदको। तथा
त्वस्य केवलान्वयित्वस्य। स्वं गुणनाशः। स्वाभावसत्त्वेनेति। स्वं गुणाभावः तथा च गुणाभावाभावरूपसंयोगादिसंबंधसत्त्वेनेत्यर्थः। अभावासत्त्वप्रसं-
गः। संयोगादिसंबंधावच्छिन्नप्रतियोगिताकगुणत्वसंताभावासत्त्वप्रसंगः। केवलेति। केवलान्वयितावच्छेदकसंबंधसामान्ये पदभावप्रतियो-
गिप्रतियोगिकत्वाभावमात्रनिवेशे संयोगादेः केवलान्वयित्वापत्तिः संयोगप्रतियोगिकसमवाये संयोगप्रतियोगिकत्वसत्त्वे न संयोगाभावे

प्रतियोगितासामानाधिकरण्याभावात्। किंचिदधिकरणानुयोगिकत्वनिवेशे चसंयोगप्रतियोगिकसमवायेगुणानुयोगिकत्वादेवोभयाभाव
सत्त्वान्न दोषः। लाघवादाहयत्किंचिदिति। वैयधिकरण्येपित्युयादानं चाभावविशेषणतानार्यं केवलान्वयिवृत्तिधर्मस्य न कदाचिदपि किंचिदधि
करणावृत्तितानवच्छेदकः सर्वत्रैवाधिकरणे केवलान्वयिनो वृत्तेः किंतु व्यतिरेकिधर्म एव तथा तदवच्छिन्नाभावस्य प्रतियोगिव्यधिकरणा
वृत्तिलक्षणासमन्वयः। संयोगाभावस्य च गुणावृत्तितानवच्छेदकीभूतसंयोगत्वावच्छिन्नप्रतियोगिताकत्वात्र संयोगस्य केवलान्वयित्वं।
गगनाभावस्य च किंचिद्वृत्तितानवच्छेदकगगनत्वावच्छिन्नप्रतियोगिताकत्वान्न तमादाय गगनस्य केवलान्वयित्वमिति। अथ सत्तायाः समवाये
न केवलान्वयित्वापत्तिः सत्तात्वस्य समवायसंबंधावच्छिन्नद्रव्यादिवृत्तितावच्छेदकत्वात् सामान्यादिवृत्तित्वस्य समवायेनावच्छिन्नतयादुर्धरत्वात्
सत्ताभावस्य लक्षणाघटकत्वात्। न च तस्य स्वरूपसंबंधावच्छिन्नवृत्तितानवच्छेदकत्वान्न दोष इति वाच्यं। समवायेन सत्तानाद्यभावमादाय तानादाव
व्याप्तिवारणाय केवलान्वयिताघटकसंबंधावच्छिन्नवृत्तितायाश्च वक्तव्यत्वादिति चेन्न। केवलान्वयिताघटकसंबंधावच्छिन्नवृत्तितानवच्छे
दकपदेन यत्किंचिन्निरूपितवृत्तितासामान्ये केवलान्वयिताघटकसंबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तद्धर्मावच्छिन्नप्रतियोगि
तानवच्छेदकत्वस्य वाच्यत्वात्। अथ केवलान्वयिताघटकसंबंधेयादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वकिंचिदनुयोगिकत्वोभ 
याभावः तादृशप्रतियोगितानवच्छेदकत्वापेक्षया ईदृशकेवलान्वयित्वस्य किं लाघवमिति चेत्। न किंचित्। न्यूनताभंगार्थं ते वयं प्राचीनवर्त्मा।ऽपि

सत्त्ववत्त्वानुसरणात्॥ अत्र च यत्किंचिदधिकरणवृत्तित्वसामान्ये यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभाववत्तद्धर्मभिन्नधर्मवत्त्वं केव
लान्वयित्वमिति सूत्रलाघवं। वाच्यत्वत्वे विशिष्टवाच्यत्वत्वादिभेदासत्वेन तद्धर्मापर्याप्तविषयतावत्त्वं विवक्षणीयं। यदि केवलान्वयिताघटकसं
बंधे यद्धर्मावच्छिन्नप्रतियोगिकत्वकिंचिदनुयोगिकत्वोभयाभाववत्तत्संबंधेन तद्धर्मान्यधर्मवत्त्वं न वक्तुं शक्यते तदाथवा प्रतियोगितावच्छेदकसंबंधेन य
थाश्रुतप्रतियोग्यधिकरणाभावीयकेवलान्वयिताघटकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकधर्मवत्त्वरूपलक्षणे केवलान्वयिताघटकसंबं
धेन प्रतियोग्यधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपलक्षणे च गगनादेरुक्तरीत्या केवलान्वयित्वापत्तिवारणाय केवलान्वयिताघटक
संबंधेन उभयाभावगर्भप्रतियोगिवैयधिकरण्यं प्रवेश्य दीधितिकाराणां निष्कर्षे हि महीय एवापरं तु प्रतियोगितायां केवलान्वयिताघटकसंबंध
कत्वस्य फल्गुतासादतः स्वयं प्रतियोगितावच्छेदकसंबंधेन यत्किंचिदधिकरणवृत्तितानवच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वं दर्शितं। तच्च किं
चिन्निरूपितवृत्तित्वसामान्ये प्रतियोगितावच्छेदकसंबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावः तद्धर्मावच्छिन्नप्रतियोगिताकत्वरूपं तेन सत्तापा न स
मवायेन केवलान्वयित्वं। एवं च तद्धर्मावच्छिन्नप्रतियोगितायां यद्धर्मावच्छिन्नत्वयत्संबंधावच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नत्वं तेन संबं
धेन केवलान्वयित्वमिति विवक्षितं। तेन स्ववृत्तिप्रमेयत्वादिसंबंधेन ज्ञानत्वादेः केवलान्वयित्वेऽपि न क्षतिरिति दिक्। वाच्येन संबंधेनेति। समवायसंबं
धेन घटत्वाभावाभावरूपघटत्ववत्ताज्ञानस्य कालिकसंबंधावच्छिन्नप्रतियोगिताकघटत्वाभाववत्ताज्ञानाप्रतिबंधकतया न घटत्वरूपाभावस्य व्याप्य

ग॰टी॰
९

वृत्तित्वं नातः केवलान्वयिनः कालिकसंबंधावच्छिन्नाभावस्य केवलान्वयित्वासंग्रहः। आद्येति। न तु समानप्रकारतामात्रेण प्रतिबंधकत्वं इदं साध्याभा
ववद्वृत्तित्वाकारकज्ञानं प्रति इदं साध्यवद्वृत्तिनिश्चयत्वेन प्रतिबंधकतायां प्रकारतासाम्यं तद्धर्मावच्छिन्नविशेष्यतानिरूपितत्वे सति तद्धर्मावच्छिन्न
प्रकारतानिरूपिततद्धर्मावच्छिन्नाभावत्वानवच्छिन्नप्रकारतान्यप्रकारतात्वेन वाच्यं। न चैवं घटाभावत्वाद्यवच्छिन्नप्रकारतायाः कालिकादिसंबंधा
वच्छिन्नत्यभावादिप्रकारतायाश्च साम्यापत्तिरिति वाच्यं। तादात्म्यत्वनिरूपितप्रकारतात्वान्यतरसंबंधेन तद्धर्मावच्छिन्नप्रकारताविशिष्टत्वेन विशे
षणीयत्वात् तादात्म्यप्रतियोगिप्रकारताघटकसंबंधघटितविरोधिताघटकसंबंधावच्छिन्ना द्वितीयसंबंधघटकप्रकारतानिवेशः। स्वावच्छिन्नयत्सं
बंधावच्छिन्नप्रकारतात्वस्वावच्छिन्नप्रकारतानिरूपितत्वसंबंधघटितविरोधिताघटकसंबंधावच्छिन्नप्रकारतात्वान्यतरसंबंधेन तद्धर्मवत्त्वमिति नि
र्गलितं विशिष्यसंयोगत्वदैशिकविशेषणतात्वादिना वा संबंधो निवेश्यः। अतश्चात्र साध्याभाववद्वृत्तिज्ञानीयसाध्याभावविशेष्यताया न प्रतिबध्य
तावच्छेदकत्वं। एवं चैतन्मते प्रकारतात्वादिरूपविशेषधर्माननुगम्य तद्धर्मावच्छिन्नविषयतानिरूपितत्वे सति तद्धर्मावच्छिन्नविषयतानिरूपिताभा
वत्वानवच्छिन्नविषयतान्यविषयतात्वेन विषयतासाम्यं वाच्यं। शेषं प्राग्वत्। न च यथेदं साध्यवदन्नसाध्यं। अत्र साध्यं न वा इदं साध्यं वन्न वेति ज्ञानच
तुष्टयसाधारणं तथैव साध्ये इदं साध्यमिदं वन्न साध्ये इदं न वा साध्यमिदं वन्न वेति ज्ञानचतुष्टयसाधारणमात्रर्थप्रसंग इति चेन्न। तद्धर्मावच्छिन्न
विषयतानिरूपिततद्धर्मावच्छिन्नविषयताशालिनिश्चयत्वेन प्रतिबंधकतातन्त्रैकरूप्यं विषयतायां तत्संबंधानवच्छिन्नप्रकारतान्यत्वं। अन्यथात राम ९

नी२

ष्यां तत्संबंधावच्छिन्नाधेयतासंबंधानवच्छिन्नप्रकारतात्वं निवेश्यं। तद्धर्मावच्छिन्नविषयतानिरूपितदैशिकविशेषणतासंबंधावच्छिन्नाभाव
प्रकारतानिरूपिततद्धर्मावच्छिन्नविषयताशालिज्ञानत्वेन पक्षः साध्याभाववान् साध्यं पक्षाभाववदिति ज्ञानयोः प्रतिबध्यता। प्रथमविषयतायां
तत्संबंधावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगितासंबंधानवच्छिन्नप्रकारतात्वं। द्वितीयस्यां च तत्संबंधावच्छिन्नाधेयतासंबंधावच्छिन्नतद्धर्माव
च्छिन्नप्रतियोगितासंबंधानवच्छिन्नप्रकारतात्वं निवेश्यं एवमेव पक्षे साध्याभावः साध्ये पक्षाभावः इति ज्ञानयोः साध्यं पक्षनिष्ठाभावप्रतियोगिन
वेति संशयस्य च संग्रह हृत्यः। जातिविशेषत्वादिनेति अथ स्वावच्छिन्नव्यापकतावच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यावच्छिन्नत्वं स्वनि
ष्ठावच्छेदकतानिरूपकहेतुनिष्ठावच्छेदकतानिरूपकाधिकरणतानिष्ठावच्छेदकतानिरूपकाधेयत्वनिष्ठाव[redacted]
च्छेदकतानिष्ठावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपकावच्छेदकत्वनिष्ठावच्छेदकतानिरूपका
भावनिष्ठावच्छेदकतानिरूपकवह्नित्वनिष्ठावच्छेदकतानिरूपकवह्निनिष्ठावच्छेदकतानिरूपकाधिकरणतानिष्ठावच्छेदकतानिरूपकाधेयतानिष्ठा
वच्छेदकतानिरूपकत्वं तत्र धूमसमानाधिकरणाद्यभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणधूमवान्पर्वत इति ज्ञानवार
णायाधेयत्वनिष्ठावच्छेदकतायां स्वनिरूपकावच्छेदकतानिरूपकत्वसंबंधेनाभावत्वनिष्ठावच्छेदकतान्यावच्छेदकताविशिष्टान्यत्वं निवेशनीयं
नीलधूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणधूमवानित्यादिज्ञानवारणाय स्वनिष्ठावच्छेदकता

ग॰टी॰
१०

10

यांनिरवच्छिन्नत्वेसतिस्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेनावच्छेदकताविशिष्टान्यत्वंनिवेश्यं।तेनजातिविशेषवद्व्यापकेसादिज्ञानस्या
पिवारणं।अथवानिरवच्छिन्नस्वनिष्ठावच्छेदकताभ्यावच्छेदकतानिरूपकत्वंहेतुनिष्ठावच्छेदकतायांनिवेश्यंहेतुनिष्ठताधिकरणानिष्ठत्वादे
र्निवेशः।आधेयताताद्यवच्छिन्नत्वस्यचनिवेशःसुधीभिरूह्यइतिचेन्न।तथासतिनीलधूमव्यापकवह्निमदन्निनीलधूमवान्जातिविशेष
वद्व्यापकवह्निमदन्निजातिविशेषवद्वानितिपरामर्शानांपृथक्हेतुतापत्त्यागौरवात्।नचसाध्याभाववदवृत्तित्वस्यव्याप्तित्वेव्यभिचाराज्ञान
प्रतिबध्यत्वानुरोधेनपृथक्नीलधूमत्वादिपुरस्कारेणतत्तद्व्याप्तिप्रकारकपरामर्शानांहेतुतयासाम्यमितिवाच्यं।एतदेवाप्येसादिनाशंकास्व
यमेवसमाधास्यमानत्वात्।किंचिद्धर्मावच्छिन्नत्वनिवेशेगौरवादाहवस्तुतइति।निर्धर्मितेति।व्यभिचारांशेधर्मितावच्छेदकानवगाहित
द्विशिष्टवैशिष्ट्यनिश्चयेपिपक्षवृत्तिर्धूमःधूमश्चाव्यभिचारवानितिनिश्चयस्योपयोगितयाधूमत्वविशिष्टव्यभिचाराग्रहदशायांचतदनुदयेनोक्त
रीत्यातादृशविशिष्टवैशिष्ट्यावगाहिनिश्चयानुदयादितिभावः।वह्निव्यभिचाराभावविशिष्टस्ववृत्तिकत्वरूपविशेषदर्शनविरोधितयापूर्वसं
शयस्योत्तरसंशयंप्रत्यनुकूलस्यसूचनायोचितेत्युक्तं।सर्वैरवेतिपक्षताग्रंथोक्तरीतिस्तुनसर्वमतसिद्धेतिभावः।परंपरासंबंधावलंबनेनास्व
रसः।व्याप्यांतरनिश्चयानात्मकइति।।अन्यथाव्याप्यांतरांशेपिसंशयत्वापत्तेरितिभावः।धूमत्वाद्यवच्छिन्नाभावव्याप्यत्वावच्छिन्नाभावमात्रको राम॰
टौषौविभिन्नावेवेतिबोध्यं।नीलपर्वतोवह्निमान्पर्वतोवन्ह्यभाववान्वेत्यादौविशेष्यतयोरभेदांशेभवेपिअवच्छेद्यावच्छेदकभावउपेयतेबाध १०

कामावादितिमतान्तरमुत्थापपत्तिसंशायेइति। एकवाक्यतेतितत्प्रयोज्यविषयतायाः साक्षात्परंपरया वा प्रयोजिकाया विषयतानत्प्रयोजकत्वं त
देकवाक्यत्वं। ननु घटतदभाववद्भूतलमित्यादिवाक्ये घटस्य तदभावस्य च घटतदभावौ इतीतरेतरद्वंद्वे तदुत्तरमतुवर्थाधिकरणे लुप्तमतुवर्थद्वित्ववि
शिष्टस्यैव तदुभयस्यान्वय उपेयते। एवं समाहारद्वंद्वेपि समाहारसंज्ञावशात्प्रयोगस्यैकवचनांतत्वेपि तत्र समुदायत्वस्य मतुवर्थतया भानस्यापाति
यादत्वाद्येसादोषसत्वात्। समासस्यैव हि साहित्ये लक्षणा आकारे निराक्रियते न तु मत्वर्थद्वित्वादिभाने। एवं चैकद्वित्वविषयतामादायैकवा
क्यताया उपपत्तेरवच्छेद्यावच्छेदकभावानापन्नविशेष्यताद्वयनिरूपकतापाकन्नेयगमसंभवात्तन्निश्चयत्वानुपपत्तिरित्यत आह दिगिति। दिगर्थ
स्तु पत्रैक एव शब्दः भावाभावोभयवाचकः अदिष्टादिः अदिष्टेनुष्णुभाष्णुभेइत्समदात्तत्रादिष्टवद्भूतलमित्यादौ कथमपि द्वित्वभानासंभवात्तन्निश्च
यत्वानुपपत्तिरिति। नच स्वकृदुच्चरितेति शुत्पत्तिविरोधः तस्य तात्पर्यविशेषविरहस्थलीयत्वात्। किंच विशेष्यतयोरवच्छेद्यावच्छेदकभावेमा
नाभावः यतः प्रकारितयोः अवच्छेद्यावच्छेदकभावमते भूतलेघटसंदेहनीत्यादौ ज्ञानविशेषणतानापन्नाभूतलविशेष्यकत्वावच्छिन्नघटप्रकारि
तायाअवच्छिन्नत्वसंबंधेन घटाभावप्रकारिताविशिष्टज्ञानैकदेशप्रकारितायामप्यन्वयः। समभिव्याहृतपदार्थतावच्छेदकावच्छिन्नाभावप्र
कारिताविशिष्टज्ञानस्य संदेहपदार्थत्वात्। विशेष्यतयोरवच्छेद्यावच्छेदकभावमते च दर्शितसंदेहपदार्थघटकप्रकारितायां घटप्रकारितानिरू
पितविशेष्यतावच्छिन्नविशेष्यतानिरूपितत्वान्वयो वाच्यः तन्त्रे दशार्थे ऽनुशासनाभावः। नच भूतलपदोत्तरसप्तम्या विशेष्यत्वमर्थः। विभक्त्यर्थे विभ

न्तर्थान्वयस्याभ्युपगन्तत्वात् त्वन्मिते वृत्त्यान्वयाभावाच्चेति। दर्शितमतद्वयं प्रकारान्तरेणा दूषयतां मतमाह भावद्वयेति। अभावप्रकारत्वानिरूपि
त्वादिनेति। आदिनाऽभावप्रकारकविषयत्वानवच्छिन्नत्वपरिग्रहः॥ अतिप्रसंगः वह्निव्याप्यधूमवान् जलवान्वेति ज्ञानस्य कारणत्वापत्तिः। भा
वद्वयकोटिकत्वे हृचिः। धूमत्वावच्छिन्नाभावकोटिकसंशयात्मकव्याप्यवत्तानिश्चयोपगमेऽस्य एवात्। धूमत्वावच्छिन्नाभावादिकोटिकसं
शयेपि व्याप्यत्वावच्छिन्नाभावादिकोटिकत्वमनंगीकुर्वतामनुरोधेनाहेदंत्विति। संशयत्वस्य जातिविशेषत्वमतमनुरुध्यान आह संशयत्वे
ति। वाकारेणास्यार्थः। चाक्षुषत्वादिना सांकर्यमेवारणायमानसत्वव्याप्येति। सहकारितायाइति। प्रथमपरामर्शेऽभावारोपज्ञानसत्वे द्वितीयप
रामर्शजन्याभावाएवानुमितिरितिभावः। तत्र द्विषयतासंबंधेन स्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वनिष्ठप्रकारतानिरूपितस्वावच्छिन्न
प्रकारतानिरूपितविषयताविशेषसंबंधेन धूमादिप्रकारतानुपादानेदोषमाह आलोकादीति। इदंज्ञानं धूमाभाववति धूमप्रकारकं धूमाभावव
ति आलोकप्रकारकं चेति ग्रहे इत्यर्थः। आलोकत्वावच्छिन्नप्रकारताकविशेष्यतासंबंधेनाप्रामाण्यग्रहविशिष्टत्वात्प्रथमप्रकारतानिरूपितत्वा
तं धूमत्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वनिष्ठप्रकारतानिरूपितत्वाद्द्वितीयं तत्। ज्ञानभेदेपि विषयतैक्यपक्षे इदं। ज्ञानभेदेन विषयताभेदम
ते त्वाह वस्तुतस्त्विति। स्वनिरूपकेति। आलोकाभाववद्घटितभ्रमत्वज्ञानविशिष्टतत्पुरुषीयतदीयधूमाभाववद्घटितभ्रमत्वज्ञानविशेष्यात्र तत्पुरुषी
यधूमपरामर्शात्तद्धर्मिकधूमाभाववद्घटितभ्रमत्वज्ञानकालीनाच्च धूमपरामर्शादनुमितिः क्रमेणाफलं बोध्यं। ज्ञानभेदेपि विषयतापाएकत्वेन प्र

ष्टतविशेष्यतानिरूपितव्याप्यत्वावच्छिन्नप्रकारताकनिश्चयत्वेनानुमितिहेतुत्वं प्रकारताकत्वं च व्याप्यत्वधर्मितावच्छेदकोपःस्थावच्छेदको
धर्मः तद्विशिष्टप्रकारतानिरूपितविशेष्यतासामानाधिकरण्योभयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वस्वनिरूपकत्वोभयसंबंधेन। वै
शिष्ट्यं च प्रकारतायां स्वावच्छिन्नाभाववद्वृत्तिविशेष्यतानिरूपितत्वावच्छिन्नत्वस्वावच्छिन्नप्रकारतात्वावच्छिन्नत्वोभयसंबंधेनेति दिक्। केचित्तु लाघ
रसः परंपरायाः संबंधत्वावलंबनात्। अप्रामाण्यग्रहस्त्वे इति भ्रमत्वघटकधूमत्वावच्छिन्नाभाववत्ताज्ञानस्य व्याप्यतावच्छिन्नाभाववत्त्वसंशयसा
मग्रीत्वात् तादृशधूमत्वावच्छिन्नाभाववत्त्वव्याप्यतदभावसहचरितत्वात्। अपि ह्यप्रामाण्यग्रहे तु धूमपरामर्शे विरोधितायाः अवधारणांशे ध्यां सं
शयस्येति व्याप्यत्वावच्छिन्नप्रकारकविषयतायां व्याप्यत्वावच्छिन्नाभाववद्वृत्तिनिष्ठत्वसंशयस्येत्यर्थः॥ नन्वविरोधत्वसंदेहविरहविशिष्टविशे
ष्यसंबंधज्ञानत्वप्रतिबंधकस्य विशेषणसंदेहेनायसारणादिति भावः। व्याप्याभावसंशयस्य साधारणधर्मदर्शनादिजन्यतया न तदसत्त्वे संदेहा
सत्त्वसूचनाय प्रायशब्द इति। यदि चोदासीनधूमत्वावच्छिन्नाभाववद्वृत्तित्वभ्रमत्वे तन्नाभावायेस्यायामप्यागृहीतेतदाप्याहयत्वाध्यपसकेति। साध्य
संबंधत्वमेवेति। न च व्यापकताघटकसंबंधत्वमेव तथा वाच्यमिति वाच्यं पर्वतो वह्निमानिति साध्यतावच्छेदकविशिष्टवैशिष्ट्यसावगमिस्तु तदोषेनत
स्यरिसागात्। तत्र केवलसंबंधस्यैव प्रतियोगितावच्छेदकत्वादन्यथा परामर्शस्य भ्रमत्वापत्तेः। पतसंबंधावच्छिन्नत्वत्त्वेरितिहेतुतावच्छेदकसंबंधा
न्यहेतुप्रतियोगिकसंबंधातिरिक्तसंबंधावच्छिन्नत्वनिवेशप्रसंगस्थितिव्यापकतापरामर्शेति। तथा चोक्तं पर्वतो वह्निव्याप्यधूमवान्पापारामय

ग॰टी॰
१२
12

स्वर्यापाणामया वृत्तिश्च वह्निरिति ज्ञानेन तु स्वपीगस्य संपर्वेतवृत्तिधूमव्यापको वह्निर्धूमवद्वृत्तिश्चेति ज्ञानमिति। विशिष्टवह्नित्वस्य गुरुतया
तदवच्छिन्नाभावासत्त्वादाह महानसीयत्वादीति। विवक्षितोऽइति। महानसीयत्ववह्नित्वोभयत्वावच्छेदेन प्रतियोगितावच्छेदकत्वपर्याप्त्युपगमेऽपि
तादृशसंबंधावच्छिन्नतादृशावच्छेदकताभावः प्रतियोऽप्यनवच्छेदेन वह्नित्वमात्रवृत्तिधर्मावच्छेदेन नञ्ञोऽयेयतेमानाभावान्नप्रतियोगितान
वच्छेदकेति नञ् अस्तास्तानुरोधादाह च वह्नित्वादीति। वस्तुतस्तु गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमते सामानाधिकरण्यसंबंधेन महानसीयत्व
विशिष्टवह्नित्वावच्छिन्नाभावोऽपि याप्रामाणिकः। एवं च विशिष्टवह्नित्वत्वस्यावच्छेदकतापर्याप्त्यवच्छेदकत्वपाके वलवह्नित्वत्वावच्छिन्नपर्याप्तेः
तदनवच्छेद्यत्वदुर्घटं। पर्याप्त्यवच्छेदकतापर्याप्त्यधिकरणधर्मानवच्छिन्नत्वनिवेशे तु प्रयासाधातः। एवं महानसीयवह्निभिन्नवह्निमान् धूमादित्यादा
वतिव्याप्तिवारणाय साध्यतावच्छेदकतापर्याप्त्यधिकरणो तादृशविषयतापर्याप्त्यधिकरणत्वं वाच्यं तथा च गौरवमित्यत आह वह्नित्वादीति विशिष्ट
वह्नित्वावच्छिन्नप्रतियोगितायां महानसीयत्वावच्छिन्नत्वमस्त्येव साध्यस्य रूपप्रसाधारणावच्छेदकतायां निरूपकत्वाघटकत्वात्प्रतियोगितावच्छेदकता
यां निरवच्छिन्नत्वनिवेशाद्वा। दुर्वारत्वादिति विधेयतावच्छेदकतायद्धर्मावच्छिन्नपर्याप्तातद्धर्मावच्छिन्नानुयोगिताकत्वं तु तादृशावच्छेदकताभावेन वि
शेषणं। पर्याप्त्यनवच्छेदकधर्मावच्छेदेनावच्छेदकताभावानुपगमेनैवोपपत्तौ विशेषणानिवेशे महागौरवात् न च प्रतियोगिताविशेषणोपादाने गौर
वं तस्याखंडाभावसंपादकत्वात् अप्रामाणिकपर्याप्त्यवच्छिन्नप्रतियोगिताकमप्रामाणिकाव्याप्यवृत्तिकमभावमुपेत्य विशेषणानिवेशानपेक्षप्र

राम॰
१२

तियोगिता विशेषणाप्रसक्त्यापत्तेश्चाद्दुर्वारेति। न च व्यभिचारः धीप्रतिबंधकताश्रयज्ञानत्वेन कारणत्वं। आश्रयत्वं च स्वाश्रयत्वप्रकृतपक्षविशेष्यता
निरूपितहेतुविषयतानिरूपितसामानाधिकरण्यापन्नविषयतानिरूपितसाध्यविषयतानिरूपितस्वावच्छेदकीभूतसाध्यतावच्छेदकविषयता
शालित्वोभयसंबंधेनेति वाच्यं। परंपरायाश्च संबंधत्वात्। अखंडधर्मत्वाभावेनेति। ज्ञानसखंडोपाध्यन्यतरत्वं विशेष्यतानवच्छिन्नप्रकारत्वव्यापक
मिति नियमादिति भावः। अथैवमयं घटइत्यादिव्यवसायविषयेऽहंत्वे घटादिनिष्ठरूपायात्मके व्यभिचारः। परन्तु विशेष्यतानवच्छिन्नप्रकारतायां धर्मि
तावच्छेदकताभिन्नत्वं विशेषणांशे इदंत्वं च धर्मितावच्छेदकमेवेति न व्यभिचार इति तन्न। घटादेरपि धर्मितावच्छेदकतया स्वरूपतो भानप्रसंगा
दिति चेन्न। धर्मितावच्छेदकपुरोवर्तित्वादीति सव्यभिचारदर्शनात्तत्राखंडधर्मात्मकपुरोवर्तित्वेन त्वेवोपेक्ष्यसाक्षात्परंपरया वा स्वरूपतस्तद्भाने
विरोधात्। वस्तुतस्तु श्चाविर्हरि दित्यादौ चाक्षुषज्ञानमिवायं घटइत्यादौ ज्ञानमेव पुरोवर्तित्वइयांस्तु विशेषः। एकत्र चाक्षुषत्वेनान्यत्र ज्ञानत्वेन ति
निरवच्छिन्नधर्मितावच्छेदकतायां मानाभाव एवेति। अथैतस्य स्वरूपतः कुतो न भानं। अत्र केचित्। निरवच्छिन्नप्रकारतासंबंधेन ज्ञानत्वावच्छि
न्नप्रति निरवच्छिन्नविषयतासंबंधेन ज्ञानत्वेन न हेतुताइदंत्वे व्यभिचारात् किंतु धर्मितावच्छेदकतान्यनिरवच्छिन्नप्रकारतासंबंधेन ज्ञानत्वावच्छि
न्नप्रति तादृशसंबंधेन ज्ञानत्वेन हेतुतेत्याहुस्तदयुक्तं निरवच्छिन्नविषयताविरहप्रयोजकस्य दुर्वचत्वात्। परन्तु क संबंधेन ज्ञानं प्रति सामानाधिक
रण्यस्वनिष्ठसमवायसंबंधावच्छिन्नप्रतियोगिताकभेदवत्त्वोभयसंबंधेन सत्त्वेन कारणत्वमिति तन्न। प्रकारतात्वादि अखंडधर्मेषु समवायघ

ग॰टी॰
१२
13

रितसामानाधिकरण्याभावेनव्यभिचारात् । यत्र कथंचित्सामानाधिकरण्यप्रवेशो कदाचिद्गुणाभावादेरपि स्वरूपतो भानप्रसंगात् । अवस्तु
तस्तु अनवच्छिन्नप्रकारताऽसंभवेन ज्ञानं प्रति अखंडधर्मवत्त्वं प्रतिबंधकमिति स्यात् । उक्तरूपेणेति । अन्यथासिद्धतयेत्याशयः । आविरुद्धमि
ति । अनन्यथासिद्धत्वोपगमादिति भावः । अयं ज्ञानवानिति सिद्धिदशायां ज्ञानवानित्यनुमित्यनुदयात् तादृशानुमितिलोप इत्यतोऽस्ती
ति । आदिना बाधविशेषपरिग्रहः । ननु दर्शितस्थले फलवैषम्यमानुभविकं तद्गुरोधेन चानवच्छेदकत्वज्ञानत्वोभयावच्छिन्नावच्छेदक
ताकनिरवच्छिन्नज्ञानत्वनिष्ठावच्छेदकताकपरामर्शीयप्रकारताया एव निरवच्छिन्नविधेयतावच्छेदकताप्रयोजकत्वमुपेयमित्यत आ
ह ज्ञानत्ववदिति । अत्रानवच्छेदकत्वधर्मितावच्छेदकतापन्नज्ञानत्वत्वावच्छिन्ननिर्विशेषितज्ञानत्वयोः परामर्शीयोपादृशधर्मितावच्छेद
कप्रकारभावः तादृशांतमनुन्मुच्येव विधेयतावच्छेदकत्वोपगमात् ज्ञानत्ववान् ज्ञानवानित्यनुमितिः । निर्विशेषितज्ञानत्वाप्रकारक सविशे
षितज्ञानत्वप्रकारकविषयतायाः सविशेषितज्ञानत्वावच्छिन्नविधेयताप्रयोजकत्वात् ज्ञानत्वावच्छिन्नवानित्यनुमितिः निर्विशेषितज्ञा
नत्वप्रकारकाभिन्नसविशेषितज्ञानत्वप्रकारकविषयताया निर्विशेषितज्ञानत्वावच्छिन्नविधेयताप्रयोजकतया ज्ञानवानित्यनुमितिः । न चै राम॰
कत्रद्वयमिति रीत्या विषयतयोर्नाभेदोऽवच्छेद्यावच्छेदकभावो वेति वाच्यं । तन्मतेऽपि सामानाधिकरण्यविषयताया ऐकांडुरपह्नवं अन्यथा ज्ञानं १३
तादृशज्ञानत्वावच्छिन्नसामानाधिकरण्यांश्चेत्याकारताप्रसंगात् । एवं च धर्मितावच्छेदकप्रकारभावमनुन्मुच्यतथाविधज्ञानत्वत्वावच्छिन्नाव

च्छेदकताकप्रकारतानिरूपितविशेष्यताकतद्भिन्नप्रकारतैवतत्प्रयोजिकावस्तुतस्तुधर्मितावच्छेदकप्रकारभावानापन्नस्वरूपतोज्ञाततत्व
प्रकारितानिरूपितनकाचिदनुपपत्तिरितिसूक्ष्मविवेचनचतुराः। इत्यपिवदंतीत्यस्वरससूचनाय। सचविशिष्टपरामर्शनिर्वाह्यप्रतियोगिता
वृत्तिताद्दृशाभावकत्वेनसाध्यतावच्छेदकनिवेशेवह्न्यन्तीस्वार्थविषयतायाजनकतावच्छेदकत्वस्वीकारापत्तिः व्यभिचारज्ञानाविरोधितयाका
रणत्वखंडनएवनिर्भरस्येति। वह्निमानित्यनुमितौप्रतियोगिताभावज्ञानमात्रंनकारणंदृश्यत्वेनप्रतियोगिताभावज्ञानादपितदापत्तेरित्य
तोवह्नित्वेनेति। सर्वसामंजस्यमिति। नचप्रतियोगितायाअव्याप्यवृत्तित्वंदूषितमेवेतिवाच्यं। विशिष्टाभावविशेषानुरोधेनतदव्याप्यवृत्तित्व
स्यावश्यकत्वात्। नचव्यभिचारग्रहाविरोधित्वाभूतलंघटवदितिज्ञानंप्रतिविरोधभूतलावृत्तित्वज्ञानस्येवव्यभिचारज्ञानेसाध्यहेतुसमाना
धिकरणाभावाप्रतियोगीतिज्ञानस्यप्रतिबंधकत्वावश्यकत्वात्समानप्रकारतामतेव्यभिचारज्ञानाविरोधित्वंचास्वरसवीजं। अभावत्वाव
च्छेदेनेतिकेचित्तुनअनुभावोवाच्यत्वाभाववानितिज्ञानस्याभावत्वावच्छेदेनवाच्यत्वाभावावगाहिनोऽभावत्वसामानाधिकरण्येनवाच्यत्वाव
गाहितयाआहार्यत्वेनाप्रतिबंधकत्वंदुर्वारं। नचस्वरूपसंबंधावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगितायाप्रतियोगितावच्छेदकसंबंधत
यातेनसंबंधेनाभावेवाच्यत्वस्याभानान्नाहार्यत्वमितिवाच्यं। प्रतियोगितायाःस्वरूपसंबंधतयाताद्दृशप्रतियोगितासंबंधावच्छिन्नप्रतियोगि
तायांस्वरूपसंबंधावच्छिन्नप्रतियोगितात्वाव्याघातादिसाद्गुः। अनुयोगितायामेवप्रतियोगितोभानेनाभावइतिमतांतरमाह अनुयोगितात्वा

ग॰टी॰
१४
15

वच्छेदेनेति। प्रकारत्वे इति अन्यथानुपसंहारितामङ्गेतेति भावः। विरोधग्रंथे इति। यद्यपि संसर्गे संसर्गतावच्छेदकाभावग्रहस्य विरोधित्वस्य वा
च्यतयाप्रतियोगितावाच्यत्वत्वानवच्छिन्नेतिज्ञानस्येव विरोधित्वसंभवाद्विषयितादिसाधारणैकप्रतियोगिकत्वमवश्यापन्नमर्थं तथाप्यव
च्छेदकतायाएकजातीयत्वं विनाऽगतिः स्यान्नत्वप्रतियोगितायास्तथात्वं विनेति तदेवोक्तं। अवच्छेदकतावाच्यत्वत्वावृत्तिरिति ज्ञानं च न प्र
मात्रवच्छेदकतायामाधेयतासंबंधेन वाच्यत्वज्ञाने च वाच्यत्ववृत्तित्वावच्छिन्नाभावज्ञानं न विरोधि यत्स्याभावानवगाहित्वात्तदसंनियाम
काधेयतासंबंधावच्छिन्नप्रतियोगिताभानात्। नञ्द्विरोमणिप्रदर्शितत्रिसिद्धांतानुरोधेनाह तदीयत्वसहितानुयोगितेति। केवलतदीयत्वा
दिनेति तदीयोऽस्ति तस्यास्तीत्याद्याकारकज्ञानमित्यर्थः। अनुमित्यनुपपत्तेरिति अत्यंताभावांशे एकत्वद्वयमिति अभावत्वतदीयत्वोभयावगाहि सा
ध्यीयाभाववद्वह्निसाकारकस्य केवलान्वयित्वग्रहानिवर्त्तनीयज्ञानस्य हेतोः संभवान्न दोष इति चेन्नापत्तो निर्धर्मितावच्छेदककतद्ज्ञाना
नंप्रति तत्राऽवृत्तित्वज्ञानं प्रतिबंधकमत एवासिद्धिग्रंथे साध्यनिष्ठावृत्तित्वस्य निर्धर्मितावच्छेदककाघटकसाध्यसामानाधिकरण्यज्ञानवि
रोधित्वानविषयतयाव्याप्यत्वासिद्धत्वं दीधितिकृद्भिरुपेतमयं। एवं च साध्येप्रतियोगितासंबंधेनावृत्तित्वज्ञानकाले साध्यीयवद्वृत्तित्वज्ञानमपि
दुर्घटमेवेति। विशिष्टव्यापकताविरहव्यावर्तकेति तथा च विशेष्यव्यापकताग्राहकसामग्रीविरोधिता पश्चितिकाले विशिष्टव्यापकतानिश्चाय राम॰
पतितत्रविशिष्टव्यापकत्वविरुद्धत्वस्य विशेष्यव्यापकतायां सत्तात्तद्ग्राहकसामग्र्या अपि तादृशव्यापकत्वग्रहविरोधित्वादिति भावः। १४

विशेष्ययोः सहचारज्ञानं तत्र तद्वृत्तित्वज्ञानसहितं तत्समानाधिकरणाभावप्रतियोगित्वज्ञानरूपप्रतिबंधकत्वाभाव इति तत्सामग्री बोध्या
। प्रकारांतरमाह यद्वेति । दीधितिं खंडयति । इदमत्रेति । इत्थं रीत्या तु पाद्यज्ञानं प्रतियोगिवैयधिकरण्याघटितव्यापकतावच्छेदकताया निर्वाहार्थं तेन
तद्घटितव्यापकतावच्छेदकतायाः सर्वविषयकजन्यप्रमायां सत्त्वेपि न क्षतिः व्यतिरेकिहेतोरेतद्व्यापकताद्वयं यथायथं उभयत्र सुतरामस्यैव
। प्रमाविशेषप्रतियोगिवैयधिकरण्यघटितमधिकमप्याह यत्तीति । हेतुमद्यावद्विषयकेति तद्व्यक्तित्वेन प्रमायाः साध्यतावच्छेदकत्वलाभायान्य
तमेति । तद्व्यक्तिरेव लिंगं । असर्वविषयकान्यप्रमायाश्चेति पाठांतरं । प्रागुक्तव्यधिकरणधर्मावच्छिन्नाभावप्रामाणिकताया उक्तत्वात्तत्रानेकेव
लान्वय्यनुमानस्य साध्याभाववद्वृत्तित्वसमापि त्वेपि निष्प्रत्यूहमाह व्यधिकरणेति । दुर्वारत्वादिति । अत्र तादृशाभावसिद्धौ यथाश्रुतमिश्रल
क्षणदूषणासंगतिरिति न शंक्यं । तादृशाभावानुपगमेपि तादृशभेदमादाय तत्स्वव्यधिकरणधर्मावच्छिन्नाभावाभिन्नत्वेन साध्याभाववत्साजात्य
संभवात् मेयत्वे तत्प्रतियोगितावच्छेदकत्वसाक्षात्तया तद्दोषतादवस्थ्यात् तन्मात्रमतानुसारेणेदं दूषणमिति । लक्षणसमन्वयादिति । ए
वं सत्तावान् समवेतादित्यादौ समवायेन हेतावपि लक्षणसमन्वयो बोध्यः । आकुरित्यादि सद्विबीजं च प्रथमेवाच्यं प्रमेयादिसाध्ये हेतुव्यक्तिभेदेन व्या
प्तिभेदः । द्वितीये विशेषधर्मावच्छिन्नाधेयताकूटस्यैव सामान्यधर्मावच्छिन्नत्वेऽव्याप्तिः तृतीये च भेपादेर्हेतुतावच्छेदकत्वेऽव्याप्तिरिति । केचित्तु त्रिद
त्वनियामकपरंपरया अनुसरणमस्य । अनुव्यवसायबलादपीति । अनुव्यवसायस्यानादरे आप्यवत्तानिर्णयाधीनप्रत्यक्षात्मकसाध्यनिर्णयादेवप्र

ग॰टी॰ वृत्यादिफलनिर्वाहसंभवादनुमित्यनुच्छेदापत्तेः। अपिनादर्शितप्रतिबंधादिसमुच्चयः। अनुभवानुरोधएव। यथा भिन्नेविषयेऽनुमितिसामग्री। गुरू
१५ णी। यथा समानविषये शाब्दबोधसामग्री प्रत्यक्षसामग्री च। स्वं बलवत्सामग्री। उत्तेजकं दुर्बलसामग्रीफलेच्छा। स्वं दुर्बलसामग्री। तयोरेवेतिस
मनियताभावैकोनोत्तेजकाभाव एक एवेत्याशयः॥ अत्रेच्छाविरहविशिष्टेच्छाया उत्तेजकत्वे समनियताभावैकोपि इच्छाविरहविशिष्टेच्छात्वावच्छि
15 न्नप्रतियोगिताकत्वेनेच्छाविशिष्टेच्छाविरहत्वावच्छिन्नप्रतियोगिताकत्वेन च तत्प्रकारकंतानैकविनिगमनाविरहो दुर्वार इति कारणतानांततोपिवा
ऽनुत्पमितिकल्पांतरमाह वस्तुत इति। इच्छा। दुर्बलसामग्रीफलेच्छा। एकत्रनिवेशे इति। दुर्बलसामग्र्यामिच्छामात्रनिवेशे उभयदिशीच्छासत्त्वे बलवत्सा
मग्रीफलप्रतिबंधापत्तिः। तर्हिरहमात्रनिवेशे उभयदिशीच्छाभावासत्त्वे तदापत्तिरत इति शेषः। दिगर्थस्तु वन्ह्यभावव्यापकीभूताभावप्रतियोगिधूमवा
न्पर्वतो घटवानिति प्रत्यक्षेच्छाविशिष्टतत्सामग्र्याः पर्वतो वह्निमानित्यनुमितेः प्रतिबंधकत्वेन कल्पने तदानीं व्यतिरेकव्याप्तिविशिष्टपरामर्शरूपार्थापत्ति
सामग्रीसत्त्वे न तदभावघटितानुमितिसामग्र्या असत्त्वादेवानुमितिवारणासंभवात्। न चार्थापत्तित्वस्यानुमितित्वव्याप्यत्वमतेपि वन्ह्यभाववद्वृत्ति
धूमवान्पर्वतो घटवानिति प्रत्यक्षसामग्र्या इच्छाविशिष्टायाः पर्वतो वह्निमानित्यर्थापत्तेः प्रतिबंधकत्वेन कल्पनीयं तदानीमन्वयव्याप्तिविशिष्टपराम रा॰म॰
र्शरूपानुमितिसामग्रीसत्त्वे न तदभावघटितार्थापत्तिसामग्र्या असत्त्वादेवार्थापत्तिवारणासंभवादिति वाच्यं। तर्हि भवन्मतेर्थापत्तिं प्रतिव्यतिरेकव्या १५
प्तिविशिष्टधर्मितावच्छेदककभिन्नविषयकप्रत्यक्षेच्छाघटितताद्दृशप्रत्यक्षसामग्र्याः गुरूधारीतयाः प्रतिबंधकत्वापत्त्या गौरवादिति। इत्याशयेनेति। यद्य

पितल्लिंगकतत्पक्षकतत्साध्यकानुमितित्वावच्छिन्नं प्रति तथाविधानुमितीच्छाविरहविशिष्टसिद्ध्यभावस्य जनकत्वे विशिष्टजन्यतावच्छेदकप्रयोज
कतयैव तद्धर्मकानुमितित्वप्रयोजकत्वं अननुगतपक्षताजन्यत्वस्य दुर्वारं तथापि यद्यर्थापत्तिरूपानुमितिंप्रतिसिद्धेः प्रतिबंधकत्वमुपेयते अर्था
पत्तित्वप्रकारकेच्छाधीनानुमितौ व्यभिचारवारणायानुमित्साविरहविशिष्टसिद्ध्यभावजन्यतावच्छेदककोटौ अर्थापत्त्यन्यत्वं निवेश्यते। अर्थापत्ति
त्वप्रकारकेच्छासाधारण्येनानुमित्साया उत्तेजकत्वे तादृशेच्छाकाले व्यतिरेकिपरामर्शासत्त्वे सिद्धिसत्त्वेऽनुमित्सापत्तेः। व्यतिरेकिपरामर्शवि
शिष्टार्थापत्तित्वप्रकारकेच्छान्वयिपरामर्शविशिष्टानुमितित्वप्रकारकेच्छयोरुभयस्याप्युत्तेजकत्वे महागौरवापत्तेः। लाघवेनार्थापत्तिंप्रति अर्थाप
त्तित्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावस्य हेतुत्वमुच्यते तदेदं दूषणं। वस्तुतस्तु तल्लिंगकतत्पक्षकतत्साध्यकार्थापत्तित्वं पक्षताकार्यतावच्छे
दकमेव नोपेयते इति पक्षताकार्यत्वमर्थापत्तित्वे प्रयोजकत्वमेव। भवतां त्वन्वयिलिंगकानुमितिंप्रतीव व्यतिरेकिलिंगकानुमितिंप्रत्यपि तथाविध
पक्षतायाः कारणतयाऽनुमितित्वेऽर्थापत्तित्वे च प्रयोजकताप्रतिपत्तिरिति गौरवमिति। आहुरित्यस्वरसोद्भावनं तत्र व्याप्तिज्ञानस्य भ्रमत्वमेवोपेयं न तु
१३ वृत्तितां न रक्षत्येव। साधिकरणावृत्तिसाध्याभावाधिकरणताकत्वं वाच्यं तत्र च नोक्तदोषलेशोपीति प्रागुक्तमिति॥ ॥छ॥ ॥छ॥ ॥इतिके
वलान्वयिग्रन्थः॥ ॥छ॥ ॥छ॥ ॥स्वपंपरामर्शग्रंथे साध्यवदन्यावृत्तित्वादेरन्वयव्याप्तित्वं व्यवहृतं नैतावता तस्येदृशमूलाभिप्रायकता संभवः तस्य
व्याप्तितायाएव तन्मतेऽसत्त्वादत आह वस्तुतस्त्विति॥ विरोधेनेति। साध्यसाध्यवदन्यवृत्तीतिज्ञानमाहार्यं न संभवति साध्यवद्भेदसामानाधिकरण्य

ग.टी. प्रकारकानाहार्यज्ञानं प्रति साध्यवत्त्वविषयतावत्त्वेन विरोधित्वात् आहार्यत्वविरोधीति भावः। उपस्थितभानानियमेनेति उपस्थितासंसर्गाग्रहादेः सं
९६ भवादिति भावः इति सूचनायेति एतद्दूषणसूचनायेत्यर्थः। इति दोषमुद्धर्तुमिति यावत्। पर्यवसितार्थ इति यद्यपि साध्यतावच्छेदकावच्छिन्नानधि
करणत्वव्यापकतावच्छेदकत्वावच्छिन्नानधिकरणतात्वकधर्मवत्त्वमेव भेदस्य व्याप्यवृत्तित्वमते सुवचं तथापि साध्याभावव्यापकतायां हेत्वभावे
16 निवेशलाभार्थं तथाभिधानं अन्यथा तद्विषयकज्ञानस्याकारणत्वापत्तेरिति। यद्यपि घटपटोभयं घटपटान्यतरत्वात् घटो घटपटोभयत्वादित्या
दावव्याप्तिव्याप्तौ उभयत्वाभाववन्नद्धेदयोः सर्वमतेऽव्याप्यवृत्तितया तादृशापि शुद्धस्वरूपसंबंधेन साध्याभावाधिकरणस्य तत्स्थलीयव्याप्तौ नि
वेशनीयत्वात् न दोषः। साध्याद्यसामानाधिकरण्यरूपेति। इदं तु बोध्यं अत्रांतस्य यथा संयोगादिसाध्यकद्रव्यत्वहेतुकानुमितिनिर्वाहाय सा
ध्यवैयधिकरण्यरूपविशेषणावच्छिन्नसाध्याभावव्यापकतानुमितिसौपयिकी तथा तद्विशेषणतावच्छिन्नत्वव्यापकतापि तादृशी अन्यथा गु
णत्वाद्यभावे संयोगादिव्यापकताज्ञानानुरोधो गुणत्वादिना संयोगाद्यभावास्तित्वप्रसंगात्। हेतुवैयधिकरण्यविशेषितहेत्वभावनिष्ठसा
ध्याभावव्यापकता तु न तादृशी अन्यथा तस्य संयोगादिरूपव्यतिरेकिहेतुना आत्मत्वपृथिवीत्वाद्यनुमित्यापत्तेरिति लादिति। तन्न विभागोऽस्
त्वि स्वतो। भासमान इति साध्याभावः साध्याभावव्यापक इति विशिष्टं खलज्ञानस्याधिकारणतार्थः। साधनाभावाभाववान् तत्प्रतियोगिसाधनवा रामू० १६
निसेकृत पक्षधर्मताज्ञानस्य सहकारितार्थमाह तत्प्रतियोगितयावेति। ननु साध्याभावाभाववत्साधनादिति मूलाद्व्यतिरेकिपरामर्शजन्या

नुमितेः पर्वतो वह्न्यभावाभाववानित्याकारकत्वं प्रतीयते प्रयुक्तं चैतत्तथाविधत्वेऽपि पर्वतो वह्निमान्नवेति संशयनिवृत्तिसंभवात्। तादृशानुमितेः
पर्वतो वह्निमानित्याकारकत्वेऽन्वयिपरामर्शव्यभिचारवारणार्थं कारणाव्यवहितोत्तरत्वस्य निवेशपतंपागौरवाच्च। यत्तु तत्र वह्न्यनुमितिस्वीका-
रेऽसिद्धिप्रतिबन्धकतायां परामर्शविशिष्टेच्छानामुत्तेजकतामतेऽन्वयिपरामर्शविशिष्टेच्छाव्यतिरेकिपरामर्शविशिष्टेच्छयोर्द्वयोरुत्तेजकत्वेऽपि
योर्विशेष्यविशेषणभावे विनिगमनाविरहेण गौरवमिति तन्न [illegible] वह्न्यभावाभावानुमितिस्वीकारेऽपि तन्नासिद्धिप्रतिबन्धकतायां वह्न्यभावा-
भावसाध्यकान्वयव्याप्तिव्यतिरेकव्याप्तिविषयकपरामर्शद्वयान्यतरविशिष्टेच्छयोरुत्तेजकतया साम्यात्। न च तत्र वह्न्यभावाभावानुमिति-
स्वीकारेऽभावो न वह्नीय इति बाधबुद्धेः प्रतिबन्धकत्वकल्पनमधिकमिति वाच्यं। प्रतियोगिताविशेषसंबन्धावच्छिन्नवह्न्यभावविशिष्टाभाववै-
शिष्ट्यावगाहिप्रत्यक्षादेर्व्यतिरेकव्याप्तिविषयकपरामर्शघटितानुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेन लाघवात्। तादृशसामग्रीदशायामभा-
वो न वह्नीय इत्यादिबाधाद्यभावस्यावश्यकतया तादृशायां विशेषणतावच्छेदकप्रकारकनिर्णयरूपकारणविरहेणैव तादृशप्रत्यक्षानुत्पत्तिसि-
द्धेरित्यतस्तत्र वह्निमानित्याकारां दर्शयति। साध्याभावविरोधितेति। एतच्च पक्षैकदेशे इतरासिद्धौ तत्साकारिकैवानुमितिरिति मूलोक्तमतेन। वह्न्य-
भावादिनिषेधतयेति वक्ष्यमाणमते तु कालिकादिसंबन्धावच्छिन्नवह्न्यभावाभाववत्सिद्धिशंकावारणायेदं। तन्मते व्यतिरेकिणो वह्निमानित्यनुमितेर-
वासत्वादिति बोध्यं। अन्वयेन गम्यगमकभाव इति योजना। अन्वयेन हेतुमत्तिसाध्यान्वयेनेत्यर्थः। साध्याभाववत्त्वसाधनाभाववत्ताप्रमित्यनुपदं स्फुर

मेतत्। समाधानासंगतिरिति। तथा साध्यप्रसिद्धेस्तादृशानुमितावनपेक्षणात्। दर्शितपूर्वपक्षाशयेउपष्टंभकं द्वितीयसामग्रीतः फलोत्पत्तिम
भिप्रेत्याह साध्यसंदेह इति। एवं च पक्षैकदेशे साध्यप्रसिद्धिमालंब्य समाधानं प्रथमसामग्रीतः अनुमित्युत्पत्त्यभिप्रायकमिति भावः। तद्रूपितावच्छे
दकतापन्नधर्मो वह्नित्वत्वादिः। इंधनत्वघटितोऽभावः तद्विशेषणकेति धूमाभाववत्त्वविशिष्टप्रतियोगिकवैशिष्ट्यानवगाहिनीत्यर्थः। तादृशप्र
त्यक्ष एव ज्ञानलक्षणारूपसन्निकर्षविधया तज्ज्ञानस्यावश्यकत्वादिति भावः। दीधितिविरोधमाह एवं सतीति। विशिष्टपरामर्शरूपत्वासंभवादिति
तत्राप्युक्तरीत्या आसेविशिष्टरूपपक्षतयानुमितिहेतुत्वानुपपत्तेरिति भावः। समानविशेष्यकत्वस्यांतंत्रत्वे पर्वतत्वेनैकपर्वतपरामर्शात्सर्वृतत्वेन
पर्वतांतरेऽनुमितिदर्शनादिति भावः। साध्यप्रसिद्धीति च संशयात्मकप्रसिद्धौ तथानुमितावपि निश्चयात्मकप्रसिद्धेर्विशेषणतावच्छेदक
प्रकारकनिर्णयत्वविशिष्टवैशिष्ट्यावगाहित्वं दुर्वारमिति वाच्यं। साध्याघटितव्याप्त्यवगाहिपरामर्शस्य विशिष्टवैशिष्ट्यविषयकानुमितिविरो
धित्वात्॥ छ॥ इति व्यतिरेकिग्रंथः॥ छ॥ ॥ ॥ श्रीगुरुगोविंद ॐ सूर्य्यगणेशमहालक्ष्मीशिवविष्णायनमः॥ ॥ श्रीभैरवायनमः॥ श्री२

राम॰